premAmRitarasAyanAkhyA kRiShNAShTottarashatanAmAvaliH

# श्रीकृष्णाष्टोत्तरशतनामावली प्रेमामृतरसायनाख्या

## Document Information

Text title : premAmRitarasAyanAkhyA shrI kRiShNAShTottarashatanAmAvaliH

File name : krishna108.itx

Category : aShTottarashatanAmAvalI, vishhnu, krishna, nAmAvalI, vishnu

Location : doc_vishhnu

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : June 22, 2004, June 3, 2007

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

premAmRitarasAyanAkhyA kRiShNAShTottarashatanAmAvaliH

# श्रीकृष्णाष्टोत्तरशतनामावली प्रेमामृतरसायनाख्या

॥ श्रीः ॥

ॐ श्रीकृष्णाय नमः ।
ॐ कृष्णेन्दिरानन्दाय नमः ।
ॐ गोविन्दाय नमः ।
ॐ गोकुलोत्सवाय नमः ।
ॐ गोपालाय नमः । ५
ॐ गोपगोपीशाय नमः ।
ॐ वल्लभेन्द्राय नमः ।
ॐ व्रजेश्वराय नमः ।
ॐ प्रत्यहन्नूतनाय नमः ।
ॐ तरुणानन्दविग्रहाय नमः । १०
ॐ आनन्दैकरसास्वादिने नमः ।
ॐ सन्तोषाक्षयकोशभुवे नमः ।
ॐ आभीरिका नवानङ्गाय नमः ।
ॐ परमानन्दकन्दलाय नमः ।
ॐ वृन्दावनकलानाथाय नमः । १५
ॐ व्रजानन्दनवांकुराय नमः ।
ॐ नयनानन्दकुसुमाय नमः ।
ॐ व्रजभाग्यफलोदयाय नमः ।
ॐ प्रतिक्षणातिसुन्दराय नमः ।
ॐ मोहनाय नमः । २०
ॐ मधुराकृतये नमः ।
ॐ सुधानिर्यासनिचयसुन्दराय नमः ।
ॐ श्यामलाकृतये नमः ।
ॐ नवयौवनसंभिन्नप्रेमामृतरसार्णवाय नमः ।

ॐ इन्द्रनीलमणिस्वच्छाय नमः । २५
ॐ दलितांजनचिक्कणाय नमः ।
ॐ इन्दीवरसुखस्पर्शाय नमः ।
ॐ नीरदस्निग्धसुन्दराय नमः ।
ॐ कर्पूरागरुकस्तूरीकुंकुमाद्रांगधूसराय नमः ।
ॐ सुकुंचितकचन्यस्तलसच्छारुशिखण्डकाय नमः । ३०
ॐ मत्तालिविभ्रमत्पारिजातपुष्पावतंसकाय नमः ।
ॐ आनन्देन्दुजितानन्दपूर्णशारद्चन्द्रमसे नमः ।
ॐ श्रीमल्ललाटपाटीरतिलकालकरंजिताय नमः ।
ॐ नीलोन्नतभ्रूविलासमदालसविलोचनाय नमः ।
ॐ आकर्णरक्तसौन्दर्यलहरीदृष्टिमन्थराय नमः । ३५
ॐ घूर्णायमाननयन साचीक्षणविचक्षणाय नमः ।
ॐ अपांगेङ्गितसौभाग्यतरलीकृतलोचनाय नमः ।
ॐ ईषन्मीलितलोलाक्षाय नमः ।
ॐ सुनासापुटसुन्दराय नमः ।
ॐ गंडप्रान्तोल्लसत्स्वर्णमकराकृतिकुण्डलाय नमः । ४०
ॐ प्रसन्नानन्द वदनाय नमः ।
ॐ जगदाह्लादकारकाय नमः ।
ॐ सुस्मितामृतलावण्य प्रकाशीकृतदिङ्मुखाय नमः ।
ॐ सिन्दूरारुणसुस्निग्धमाणिक्यदशनच्छदाय नमः ।
ॐ पीयूषाधिकमाधुर्यसूक्तिश्रुतिरसायनाय नमः । ४५
ॐ त्रिभंगिललिताय नमः ।
ॐ तिर्यक्ग्रीवाय नमः ।
ॐ त्रैलोक्यमोहनाय नमः ।
ॐ कुंचिताधरसंसक्तकूजत्वेणुविशारदाय नमः ।
ॐ कंकणाङ्गदकेयूरमुद्रिकादिलसत्कराय नमः । ५०
ॐ स्वर्णसूत्रपुटन्यस्तकौस्तुभामुक्तकंधराय नमः ।
ॐ मुक्ताहारोल्लसद्वक्षस्पुरच्छ्रीवक्षलंछनाय नमः ।
ॐ आपीनहृदयाय नमः ।
ॐ नीपमालावते नमः ।
ॐ बन्धुरोदराय नमः । ५५
ॐ संवीतपीतवसनाय नमः ।

ॐ रशनाविलसत्कटये नमः ।
ॐ अन्तरीणकटीबद्धप्रपदान्दोलितांचलाय नमः ।
ॐ अरविन्दपदद्वन्द्व कलक्कणितनूपुराय नमः ।
ॐ बन्धूकारुणमाधुर्य-सुकुमारपदांबुजाय नमः । ६०
ॐ नखचन्द्रजिताशेपूर्णशारदचन्द्रमसे नमः ।
ॐ ध्वजवज्रांकुशांभोजराजच्चरणपल्लवाय नमः ।
ॐ त्रैलोक्याद्भुतसौन्दर्यपरीपाकमनोहराय नमः ।
ॐ साक्षात्केलिकलामूर्तये नमः ।
ॐ परिहासरसार्णवाय नमः । ६५
ॐ यमुनोपवनश्रेणीविलासिने नमः ।
ॐ व्रजनायकाय नमः ।
ॐ गोपाङ्गनाजनासक्ताय नमः ।
ॐ वृन्दावनपुरन्दराय नमः ।
ॐ आभीरनगरीप्राणनायकाय नमः । ७०
ॐ कामशेखराय नमः ।
ॐ यमुनानाविकाय नमः ।
ॐ गोपीपारावारकृतोद्यमाय नमः ।
ॐ राधावरोधनिरताय नमः ।
ॐ कदंबवनमन्दिराय नमः । ७५
ॐ व्रजयोषित्सदाहृद्याय नमः ।
ॐ गोपीलोचनतारकाय नमः ।
ॐ यमुनानन्दरसिकाय नमः ।
ॐ पूर्णानन्दकुतूहलिने नमः ।
ॐ गोपिकाकुचकस्तूरीपङ्किलाय नमः । ८०
ॐ केलिलालसाय नमः ।
ॐ अलक्षितकुटीरस्थाय नमः ।
ॐ राधासर्वस्वसंपुटाय नमः ।
ॐ वल्लवीवदनांभोजमधुमत्तमधुव्रताय नमः ।
ॐ निगूढरसविदे नमः । ८५
ॐ गोपीचित्ताह्लादकलानिधये नमः ।
ॐ कालिन्दीपुलिनानन्दिने नमः ।
ॐ क्रीडाताण्डवपण्डिताय नमः ।

ॐ आभीरिकानवानंगरंगसिन्धुसुधाकराय नमः ।
ॐ विदग्धगोपवनिताचित्ताकूतविनोदकाय नमः । ९०
ॐ नानोपायनपाणिस्थगोपनारीगणावृताय नमः ।
ॐ वांछाकल्पतरवे नमः ।
ॐ कोटिकन्दर्पलावण्याय नमः ।
ॐ कोटीन्दुतुलितद्युतये नमः ।
ॐ जगत्रयमनोमोहकराय नमः । ९५
ॐ मन्मथमन्मथाय नमः ।
ॐ गोपीसीमन्तिनीशश्वद्भावापेक्षपरायणाय नमः ।
ॐ नवीनमधुरस्नेहप्रेयसीप्रेमसंचयाय नमः ।
ॐ गोपीमनोरथाक्रान्ताय नमः ।
ॐ नाट्यलीलाविशारदाय नमः । १००
ॐ प्रत्यंगरभसावेशप्रमदाप्राणवल्लभाय नमः ।
ॐ रासोल्लासमदोन्मत्ताय नमः ।
ॐ राधिकारतिलंपटाय नमः ।
ॐ खेलालीलापरिश्रान्तस्वेदांकुरचिताय नमः ।
ॐ गोपिका कामुकाय नमः । १०५
ॐ श्रीमते नमः ।
ॐ मलयानिलसेविताय नमः ।
ॐ सकृत्प्रपन्नजनतासंरक्षणधुरन्धराय नमः ।
ॐ सुप्रसन्नाय नमः ।
ॐ गोपीजनवल्लभाय नमः ।

॥ इति श्रीवल्लभाचार्यविरचितं
प्रेमामृतरसायनाख्याष्टोत्तरशत नामावलिः ॥

Endoded by N. Balasubramanian bbalu at satyam.net.in

*premAmRitarasAyanAkhyA kRiShNAShTottarashatanAmAvaliH*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*